[A]जटा । [1]जटी । [2]जटिलः-[3]जटालः ।

(582) "जन जनने" (III-जुहोत्यादिः-1105. अक. सेट्. पर.)

छान्दसः ।

[4]जनकः-निका, [5]जनकः-निका, जिजनिषकः-षिका, [6]जञ्जनकः-निका, जाजायकः-यिका ;

जनिता-त्री, जनयिता-त्री, जिजनिषिता-त्री, जञ्जनिता-त्री, जाजायिता-त्री ;

[7]जज्ञत्-ती, [8]जनयन्-न्ती, जिजनिषन्-न्ती ; —

जनिष्यन्-न्ती-ती, जनयिष्यन्-न्ती-ती, जिजनिषिष्यन्-न्ती-ती ; —

— जञ्जन्यमानः-जञ्जनिष्यमाणः, जाजायमानः, जाजायिष्यमाणः ;

[9]गोजाः-गोजौ-गोजाः; — — —

---

1. जटा अस्यास्तीति जटी । अनदन्तत्वेऽपि भाष्यकारप्रयोगादिनिः—इति माधवधातुवृत्तौ ।
2. पिच्छादिषु (5-2-100) 'जटाकलाघटाः क्षेपे' (गणसूत्रम्. 5-2-100) इति वचनात् क्षेपे गम्यमाने मत्वर्थीये इलच् प्रत्यये जटिलः ।
3. मत्वर्थीये 'सिध्मादिभ्यश्च' (5-2-97) इत्यत्र 'जटाघटाकटाकालाः क्षेपे' (गणसूत्रम् 5-2-97) इति वचनात् क्षेपे गम्यमाने लप्रत्यये जटालः ।
4. ण्वुलि 'जनिवध्योश्च' (7-3-35) इत्युपधाया वृद्धिनिषेधः । एवं घञि, णमुलि च ज्ञेयम् ।
5. 'जनीजृष्—' (गणसूत्रम्-भ्वादौ) इति सूत्रे ईकारविशिष्टोपादानात्, अस्य जनधातोर्न मित्त्वप्रयुक्तो ह्रस्वः । अपितु, 'जनिवध्योश्च' (7-3-35) इत्येव णौ परतः वृद्धिनिषेधः ।
6. यङि द्वित्वे, 'ये विभाषा' (6-4-43) इति वैकल्पिकमात्त्वम् । आत्त्वाभावपक्षे, 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इत्यभ्यासस्य नुगागमे, जञ्जनकः इति, आत्त्वपक्षे जाजायकः इति च रूपम् । एवं यङन्ते सर्वत्र रूपद्वयस्योपपत्तिर्ज्ञेया ।
7. शतरि 'जुहोत्यादिभ्यः श्लुः' (2-4-75) इति श्लौ, 'श्लौ' (6-1-10) इति द्वित्वे, उत्तरखण्डे, 'गमहनजनखनघसां लोपः क्ङित्यनङि' (6-4-98) इत्युपधालोपे, 'स्तोः श्चुना श्चुः' (8-4-40) इति नकारस्य श्चुत्वे जज्ञत् इति रूपम् । 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम् न भवति ।
8. 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' (1-3-86) इति ण्यन्तात् शतैव । न शानच् ।
9. 'जनसनखनक्रमगमो विट्' (3-2-67) इति विट्प्रत्ययः । 'विड्वनोरनुनासिकस्यात्' (6-4-41) इत्यनुनासिकस्याकारे, आकारान्तं प्रातिपदिकम् । एवम्, अब्जाः, अद्रिजाः, ऋतजाः इत्यादिकं बोध्यम् ।

A. 'अशोटनीयैः सुधियामसेटकैर्युतान् जटाझाटधरैश्च केश्वन ॥' धा. का. 1.40.